श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरङ्गनाथ सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरङ्गनाथ सुप्रभातम् ॥

अम्भोरुहाणि विकसन्त्यरुणस्य भासा
    शक्रस्य दिग्भवति पाटलिता तथैव।
म्लाना भवत्युडुगणस्य रुचिर्जय त्वं
    श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ 1 ॥

भृङ्गाः पतन्ति कुमुदानि विहाय पद्मे -
    ष्वार्तं रथाङ्गमिथुनं समुपैति योगम्।
रौतीह पक्षिपरिषत्परितो जय त्वं
    श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ 2 ॥

उद्यानसद्मसु विहृत्य सह प्रियाभि -
    र्नक्तं युवान उपयान्ति पुनर्गृहाणि।
चन्द्रो न भाति सह दीपगणैर्जय त्वं
    श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ 3 ॥

नक्तं प्रपासु पथिकाः सुखसुप्तिभाजो
    निद्रां विहाय परितः स्वपथान् प्रयान्ति।
शोश्रूयते निगमपाठरवो जय त्वं
    श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ 4 ॥

विप्रा गृहीतसकलोपकराः प्रयान्ति
    स्नानादिकर्मकरणाय कवेरकन्याम्।
सङ्कल्पयन्ति वनिता वसतीर्जय त्वं
    श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ 5 ॥

सह्याद्रिजापयसि चोषसि यायजूकाः
स्नात्वाग्निहोत्रशरणे प्रणयन्ति वह्नीन्।
वीथ्यां परिभ्रमति भक्तततिर्जय त्वं
श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ 6॥

गोवाजिहस्तिगणिकाः पुरतः स्थितास्ते
वीणाध्वनिः परिजना जलपूर्णकुम्भः।
सज्जार्चकाश्च सकला इतरे जय त्वं
श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ 7॥

वेदान्तयुग्ममुभये विबुधाश्च सर्वे
त्वां बोधयन्ति मुदिताः स्तुतिभिः प्रियाभिः।
उत्तिष्ठ शेषशयनादव तान् जय त्वं
श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ 8॥

॥ इति श्रीरङ्गनाथ सुप्रभातं समाप्तम्॥